# Somotpatti Stotram

# સોમોત્પત્તિસ્તોત્રમ્

## Document Information

Text title : somotpattistotram

File name : somotpattistotram.itx

Category : navagraha

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Acknowledge-Permission: http://kshetrayaatra.blogspot.com

Latest update : July 27, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# સોમોત્પત્તિસ્તોત્રમ્

યાજુર્વૈદિકી પારમાત્મિકોપનિષદન્તર્ગતં
॥ હરિઃ ૐ ॥

ઋષય ઊચુઃ -
કૌતૂહલં સમુત્પન્નં દેવતા ઋષિભિઃ સહ ।
સંશયં પરિપૃચ્છન્તિ વ્યાસં ધર્માર્થકોવિદમ્ ॥ ૧॥

કથં વા ક્ષીયતે સોમઃ ક્ષીણો વા વર્ધતે કથમ્ ।
ઇમં પ્રશ્નં મહાભાગ બ્રૂહિ સર્વમશેષતઃ ॥ ૨॥

વ્યાસ ઉવચ -
શ ृણ્વન્તુ દેવતાઃ સર્વે યદર્થમિહ આગતાઃ ।
તમર્થં સમ્પ્રવક્ષ્યામિ સોમસ્ય ગતિમુત્તમામ્ ॥ ૩॥

અગ્નૌ હુતં ચ દત્તં ચ સર્વં સોમગતં ભવેત્ ।
તત્ર સોમઃ સમુત્પન્નઃ સ્મિતાંશુહિમવર્ષણઃ ॥ ૪॥

અષ્ટાશીતિ સહસ્રાણિ વિસ્તીર્ણો યોજનાનિ તુ ।
પ્રમાણં તત્ર વિજ્ઞેયં કલાઃ પઞ્ચદશૈવ તત્ ॥ ૫॥

ષોડશી તુ કલાપ્યત્ર ઇત્યેકોઽપિ વિધિર્ભવેત્ ।
તં ચ સોમં પપુર્દેવાઃ પર્યાયેણાનુપૂર્બશઃ ॥ ૬॥

પ્રથમાં પિબતે વહ્નિઃ દ્વિતિયાં પિબતે રવિઃ ।
વિશ્વેદેવાસ્તૃતીયાં તુ ચતુર્થીં સલિલાધિપઃ ॥ ૭॥

પઞ્ચમીં તુ વષટ્કારઃ ષષ્ટીં પિબત વાસવઃ ।
સપ્તમીં ઋષયો દિવ્યાઃ અષ્ટમીમજ એકપાત્ ॥ ૮॥

નવમીં કૃષ્ણપક્ષસ્ય યમઃ પ્રાશ્નાતિ વૈ કલામ્ ।
દશમીં પિબતે વાયુઃ પિબત્યેકાદશીમુમા ॥ ૯॥

દ્વાદશીં પિતરઃ સર્વે સમ્પ્રાશ્નન્તિ  ભાગશઃ ।
ત્રયોદશીં ધનાધ્યક્ષઃ કુબેરઃ પિબતે કલામ્ ॥ ૧૦॥

ચતુર્દશીં પશુપતિઃ પઞ્ચદશીં પ્રજાપતિઃ ।
નિષ્પીત એકકલાશેષઃ ચન્દ્રમા ન પ્રકાશતે ॥ ૧૧॥

કલા ષોડશકાયાં તુ આપઃ પ્રવિશતે સદા ।
અમાયાં તુ સદા સોમઃ ઓષધિઃ પ્રતિપદ્યતે ॥ ૧૨॥

તમોષધિગતં ગાવઃ પિબન્ત્યમ્બુગતં ચ યત્ ।
યત્ક્ષીરમમૃતં ભૂત્વા મન્ત્રપૂતં દ્વિજાતિભિઃ ॥ ૧૩॥

હુતમગ્નિષુ યજ્ઞેષુ પુનરાપ્યાયતે શશી ।
દિને દિને કલાવૃદ્ધિઃ પૌર્ણિમાસ્યાં તુ પૂર્ણતઃ ॥ ૧૪॥

નવો નવો ભવતિ જાયમાનોऽહ્નાં કેતુરુષસામેત્યગ્રે ।
ભાગં દેવેભ્યો વિદધાત્યાયન્ પ્રચન્દ્રમાસ્તગતિ  દીર્ઘમાયુઃ ॥ ૧૫॥

ત્રિમુહૂર્તં વસેદર્કે ત્રિમુહૂર્તં જલે વસેત્ ।
ત્રિમુહૂર્તં વસેદ્ગોષુ ત્રિમુહૂર્તં વનસ્પતૌ ॥ ૧૬॥

વનસ્પતિગતે સોમે યસ્તુ હિંસ્યાદ્વનસ્પતિમ્ ।
ઘોરાયાં ભ્રૂણહત્યાયાં યુજ્યતે નાત્ર સંશયઃ ॥ ૧૭॥

વનસ્પતિગતે સોમે અનડુહો યસ્તુ વાહયેત્ ।
નાશ્નન્તિ પિતરસ્તસ્ય દશવર્ષાણિ પઞ્ચ ચ ॥ ૧૮॥

વનસ્પતિગતે સોમે પન્થાનં યસ્તુ કારયેત્ ।
ગાવસ્તસ્ય પ્રણશ્યન્તિ ચિરકાલમુપસ્થિતાઃ ॥ ૧૯॥

વનસ્પતિગતે સોમે સ્ત્રિયં વા યોऽધિગચ્છતિ ।
સ્વર્ગસ્થાઃ પિતરસ્તસ્ય ચ્યવન્તે નાત્ર સેશયઃ ॥ ૨૦॥

વનસ્પતિગતે સોમે પરાન્નં યસ્તુ ભુઞ્જતિ ।
તસ્ય માસકૃતો હોમઃ દાતારમધિગચ્છતિ ॥ ૨૧॥

વનસ્પતિગતે સોમે યઃ કુર્યાદ્દન્તધાવનમ્ ।
ચન્દ્રમા ભક્ષિતો યેન પિતૃવંશસ્ય ઘાતકઃ ॥ ૨૨॥

સોમોત્પત્તિમિમાં યસ્તુ શ્રાદ્ધકાલે સદા પઠેત્ ।
તદન્નમમૃતં ભૂત્વા પિતૃણાં દત્તમક્ષયમ્ ॥ ૨૩॥

સોમોત્પત્તિમિમાં યસ્તુ ગુર્વિણીં શ્રાવયેત્પ્રિયામ્ ।
ઋષભં જનયેત્પુત્રં સર્વજ્ઞં વેદપારગમ્ ॥ ૨૪॥

સોમોત્પત્તિમિમાં યસ્તુ પર્વકાલે સદા પઠેત્ ।
સર્વાન્ કામાનવાપ્નોતિ સોમલોકં સ ગચ્છતિ ॥ ૨૫॥

શ્રીસોમલોકં સ ગચ્છત્યોં નમ ઇતિ ॥

શુક્લે દેવાન્, પિતૄન્ કૃષ્ણે, તર્પયત્યમૃતેન ચ
યશ્ચ રાજા દ્વિજાતીનાં તસ્મૈ સોમાત્મને નમઃ ॥ ૨૬॥

ઇતિ સોમોત્પત્તિઃ સ્તોત્રં સમ્પૂર્ણમ્ ।
॥ શ્રીકૃષ્ણાર્પણમસ્તુ ॥

Proofread by PSA Easwaran

*Somotpatti Stotram*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*